শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

শ্রী মেল্পপত্তূর্ নারাযণভট্টতিরি ৱিরচিতম্

# ॥শ্রীমন্নারাযণীযম্॥

## দশক - ২২

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে কৃষ্ণায পরব্রহ্মণে নমঃ
শ্রীমতে রামানুজায নমঃ

# ॥শ্রীমন্নারাযণীযম্ ॥

## দশক - ২২

*অজামিলোপাখ্যানম্*

অজামিলো নাম মহীসুরঃ পুরা
চরন্ ৱিভো ধর্মপথান্ গৃহাশ্রমী।
গুরোর্গিরা কাননমেত্য দৃষ্টৱান
সুধৃষ্টশীলাং কুলটাং মদাকুলাম্॥ ১ ॥

স্বতঃ প্রশান্তোপি তদাহৃতাশযঃ
স্বধর্মমুতসৃজ্য তযা সমারমন্।
অধর্মকারী দশমী ভৱন্ পুন-
র্দধৌ ভৱন্নামযুতে সুতে রতিম্॥ ২ ॥

স মৃত্যুকালে যমরাজকিঙকরান
ভযঙকরাংস্ত্রীনভিলক্ষযন্ ভিযা।
পুরা মনাক্ ত্বতস্মৃতিৱাসনাবলা-
জ্জুহাৱ নারাযণনামকং সুতম্॥ ৩ ॥

দুরাশযস্যাপি তদাত্বনির্গত-
ত্বদীযনামাক্ষরমাত্রবৈভৱাত্।
পুরোভিপেতুর্ভৱদীযপার্ষদা-
শ্চতুর্ভুজাঃ পীতপটা মনোরমাঃ॥ ৪ ॥

অমুং চ সম্পাশ্য ৱিকর্ষতো ভটান
ৱিমুঞ্চতেত্যারুরুধুর্বলাদমী।
নিৱারিতাস্তে চ ভৱজ্জনৈস্তদা
তদীযপাপং নিখিলং ন্যৱেদযন্॥ ৫ ॥

www.prapatti.com

ভৱন্তু পাপানি কথং তু নিষ্কৃতে
কৃতেপি ভো দণ্ডনমস্তি পণ্ডিতাঃ।
ন নিষ্কৃতিঃ কিং ৱিদিতা ভৱাদৃশা-
মিতি প্ৰভো ত্বতপুরুষা বভাষিরে॥ ৬ ॥

শ্ৰুতিস্মৃতিভ্যাং ৱিহিতা ৱ্ৰতাদযঃ
পুনন্তি পাপং ন লুনন্তি ৱাসনাম্।
অনন্তসেৱা তু নিকৃন্ততি দ্বযী-
মিতি প্ৰভো ত্বতপুরুষা বভাষিরে॥ ৭ ॥

অনেন ভো জন্মসহস্ৰকোটিভিঃ
কৃতেষু পাপেষৱপি নিষ্কৃতিঃ কৃতা।
যদগ্ৰহীন্নাম ভযাকুলো হরে-
রিতি প্ৰভো ত্বতপুরুষা বভাষিরে॥ ৮ ॥

নৃণামবুদধ্যাপি মুকুন্দকীর্তনং
দহত্যঘৌঘান্ মহিমাস্য তাদৃশঃ।
যথাগ্নিরেধাংসি যথৌষধং গদা-
নিতি প্ৰভো ত্বতপুরুষা বভাষিরে॥ ৯ ॥

ইতীরিতৈর্যাম্যভটৈরপাসৃতে
ভৱদভটানাং চ গণে তিরোহিতে।
ভৱতস্মৃতিং কঞ্চন কালমাচরন
ভৱতপদং প্ৰাপি ভৱদভটৈরসৌ॥ ১০ ॥

স্বকিঙকরাৱেদনশঙকিতো যম-
স্তৱদঙঘ্ৰিভক্তেষু ন গম্যতামিতি।
স্বকীযভৃত্যানশিশিক্ষদুচ্চকৈঃ
স দেৱ ৱাতালযনাথ পাহি মাম্॥ ১১ ॥

**********



www.prapatti.com